# शब्दविमर्शः - क्वरप्प्रत्ययान्तशब्दानामवलोकनम्।

डा. वि. आर्. मनोजः, उपनिदेशकः, चिन्मयशोधसंस्थानम्

## 1. इत्वरः।

वाञ्छा सज्जनसङ्गतौ परगुणे प्रीतिर्गुरौ नम्रता विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद् भयम्। भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खलैरेते येषु वसन्ति निर्मलगुणास्तेभ्यो महद्भ्यो नमः।। इति नीतिशतकम्। किमिदानीं हरिवचनेषु स्पृहयालुवद् भवान् ? सत्यम्। कलावस्मिन्काले तद्वचनेषु महानादरो विधेयः। लोकापवादार्णवमुत्तरीतुं विधा विधातुः कतमा तरीः स्यादिति महद्वचनमत्र स्मर्तव्यम्। अये! नात्र लोकापवादभीश्चर्चाविषयः। कस्तर्हि ? यावन्तो वा क्वरबन्ताः शब्दास्तानाकलयितुमयमुद्यमः। तत्र इत्वरशब्दोऽन्यतमः। तस्मिन्प्रसङ्गेऽभिसारिकापर्यायमित्वरीशब्दमद्राक्ष्म। तेन प्रेरिता वयमभिसारिकापर्यायाणामनुसन्धानेऽभिप्रवृत्ताः। तेषां प्रयोगानुसन्धानकाले ईदृक्पद्यानि बहून्यद्राक्ष्म। कालानुगुणमुक्तमवेक्ष्य महता आदरेण तदिह प्रस्तुतम्। यथा पद्यान्तरं श्रूयताम्। एको देवः केशवो वा शिवो वा ह्येकं मित्रं भूपतिर्वा यतिर्वा। एको वासः पत्तने वा वने वा ह्येका भार्या सुन्दरी वा दरी वा।। इति नीतिशतकम्। कोऽत्र भवता अवलोकितेषु पद्येषु ध्यातव्यो विषयः ? आद्ये स्वयोषिति रतिरिति। द्वितीये एका भार्या सुन्दरी वा दरी वेति। पुरुषार्थसाधनायोद्वहतामेकभार्याव्रतम् एकपत्नीव्रतञ्च पूर्वाचार्यैरादिष्टम्। कन्दर्पदर्पदलने विरला मनुष्या इति श्रृङ्गारशतकोक्तमिह कारणम्। को लाभ एतेनोद्बोधनेन ? कुतस्तथा सन्दिहति ? श्रूयताम्। विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशनास्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः। शाल्यन्नं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवास्तेषामिन्द्रियनिग्रहो यदि भवेद्विन्ध्यस्तरेत्सागरम्।। इति श्रृङ्गारशतके। न कोऽप्यत्र विरोधो लक्ष्यते। प्रत्युत मदुक्तं द्रढयति। कथमिव ? कामो दुर्धर्षः। अतः सावधानैः भाव्यमिति। किमत एकभार्याव्रतमभ्युपगच्छति भवान् ? न तथा। तद्वैपरीत्यार्थकं शब्दं स्मरन्नेकभार्याव्रतमहिमानं व्यञ्जयामि स्म।

कोऽसौ शब्दः ? इत्वरीति।

कोऽर्थः ? एति परपुरुषं प्राप्नोतीति इत्वरी इति तदर्थो हलायुधे वर्णितः। परपुरुषसङ्गमशीलेति यावत्। पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी स्वैरिणी पांशुलेत्यादयस्तत्पर्याया अमरोक्ताः।

प्रत्येकं विवृणुमहे। पुंसो भर्तुः सकाशात् चलति पुरुषान्तरं गच्छतीति पुंश्चली। असत्यां स्त्रियामित्यमरः। उपचारात् पारदारिकपुरुषेऽपि।

धर्षणं स्यात्परिभवे रतेऽसत्यां तु धर्षणी इति मेदिनी। धर्षिणी इति क्वचित्पाठः। प्रकारान्तरेण ञिधृषा प्रागल्भ्ये (स्वा.१२७०) इत्यस्मादिमे रूपे। अन्यत्र चर्षणीति। तन्मते कृष विलेखने (भ्वा.९९१) इति धातुः।

बन्धकीत्यस्य बन्धे स्थापितं धनमित्यर्थः। ऋणशोधनार्थं विश्वासहेतुतया आधीकृते पदार्थे इति यावत्। तद्वदाधीयमानत्वादसत्यां स्त्रियामपि।

पतिव्रतायां स्त्रियां दक्षकन्याभेदे च सती साध्वी पतिव्रतेत्यमरः। तद्भिन्नासती।

कुलात् कुलान्तरं व्यभिचारार्थमटतीति कुलटा। शकन्ध्वादित्वात्पररूपम्। या तु भिक्षार्थं कुलमटति सा कुलाटा इति तत्र न पररूपमित्यनयोर्भेदः। एवञ्चेत्वरीशब्दोऽपि समार्थकः। अभिसारिकेत्यर्थः।

तथैव स्वैरिणीति। स्वेनैव ईरयितुं शीलमस्येत्यर्थे ईरधातोः णिनिप्रत्ययो वृद्धिश्च। स्वेच्छाचारिणि स्वतन्त्रे व्यभिचारिण्यां परपुरुषचतुष्कगामिन्यां स्त्रियाञ्चायं शब्दः प्रयुज्यते।

तथा पांशुः कलङ्कस्तदस्त्यस्या इति पांशुला।

तदास्ताम्। तद्वैपरीत्यार्थकमिति वदतोपरिष्टाद्वैपरीत्यशङ्कोद्भाविता। यद्यस्ति स्त्रिय इत्वर्यस्तेनेतद्विदमः यत्सन्ति तत्र पुरुषाः य एता अनुधावन्ति। पुरुषाः इति सामान्यग्रहणमस्मभ्यं न रोचते। कुतः ? न सर्वे पुरुषास्तादृशाः। अथ यदि सर्वे तादृशाः कुतो वा स्त्रीषु पातिव्रत्यं पुरुषेषु चैकपत्नीत्वसम्भवः ? ये कुत्सिताः परयोषिति स्पृहावन्तः असंतृप्तमानसा वा ते खलु इत्वरीषु प्रवर्तन्ते। मैवं मन्वत। पुरा खलु (अद्यापि) पुमांसमुत्पथं नेतुं प्रमदाः प्रवर्तयामासुः। यथा पुरोहितसुतो धीमानुदायी पद्मषण्डवने राजकुमारं सर्वार्थसिद्धं संसारमार्गमानेतुं यतमानः पुरन्दरादीनप्युदाहरति - कामं परमिति ज्ञात्वा देवोऽपि हि पुरन्दरः। गौतमस्य मुनेः पत्नीमहल्यां चकमे पुरा।। इति बुद्धचरितम् (४.७२)। ततोऽगस्त्यबृहस्पतिचन्द्रमसां पराशरादीनाञ्च कथाः श्रावयित्वाऽन्ते एवमाद्या महात्मानो विषयान् गर्हितानपि। रतिहेतोर्बुभुजिरे प्रागेव गुणसंहितान्।। इति (४.८१) बुद्धचरितमुद्दधार। अये! विरोधश्चानेन स्मृतीनाम्। देवाः खलु जितेन्द्रियाः। किन्तु देवेषु जितेन्द्रियतापादनमनुचितमाभाति। इन्द्रेणापि दुर्जयाणीन्द्रियाणि। अन्यथा कथं कामं परमिति ज्ञात्वा देवोऽपि हि पुरन्दरः। गौतमस्य मुनेः पत्नीमहल्यां चकमे पुरेत्युपरिष्टादुद्धृतं बुद्धचरितम् (४.७२) सङ्गच्छेत ? स्वभाव एष नारीणां नराणामिह दूषणम्। अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः।। इति मनुः (२.२१३)। एवंविधानां कविवचनानामनुवाचनमस्माकं मनुष्याणां सत्पथोपदर्शनार्थम्। न देवार्थम्। सत्यम्। तत्रैव मेधातिथिभाष्ये भूयो दृश्यते यदेषा प्रकृतिः स्त्रीणां यन्नराणां धैर्यच्यावनम्। सङ्गाद्धि स्त्रियः पुरुषान्व्रताच्च्यावयेयुः। अतोऽर्थात् अस्माद्धेतोः न प्रमाद्यन्ति। दूरत एव स्त्रियः परिहरन्ति। प्रमादः स्पर्शादिकरणम्। वस्तुस्वभावोऽयं यत्तरुणी स्पृष्टा कामकृतं चित्तसङ्क्षोभं जनयति। तत्र चित्तसङ्क्षोभोऽपि प्रतिषिद्धः तिष्ठतु तावदपरो ग्राम्यधर्मसंरम्भः। एवं तर्ह्ययं सर्वो गुणपाठो निरर्थकः। न तथा मन्तव्यम्। अविद्वांसमलं लोके विद्वांसमपि वा पुनः। प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम्।। इति (२.२१४) मनुभाषितं द्रढयितुमेताः कथाः। यतो नात्र विद्वत्ता प्रभवति। शक्नुवन्ति स्त्रियः सर्वम् उत्पथम् अमार्गं लोकशास्त्रविरुद्धं विषयं नेतुं प्रापयितुं कामक्रोधवशानुगं सन्तम्। कामक्रोधाभ्यां यः सम्बध्यत इत्यर्थः। प्रमदासु कोपः कामो वा न दर्शनीयः। दूरतस्ताः। अवस्थाविशेषोपलक्षणार्थञ्चैतत्। अत्यन्तबालं अत्यन्तवृद्धं च प्राप्तयोगप्रकर्षणञ्च वर्जयित्वा येन निरन्वयमुच्छिन्ना संसारपुरुषधर्मास्तद्व्यतिरेकेण न कश्चित्पुरुषोऽस्ति यः

स्त्रीभिर्नाकृष्यते अयः कान्तेनेव लोहः। न चात्र स्त्रीणां प्रभविष्णुता वस्तुस्वाभाव्यात्तरुणीजनदर्शने पुंसामुन्मथ्यते चित्तं विशेषतो ब्रह्मचारिणाम्। तदस्तु। ननु चेह भवान् इत्वरशब्दमुपादाय इत्वरीं वर्णयति ? इत्वरीशब्दे तावदालोचयितुं किमस्ति महत्कार्यमिति चेदुपचारात् पारदारिकपुरुषेऽपि इत्वरशब्दः प्रयुज्यते। 'इण् गतौ' (अदा.१०४५) इत्यस्मात् 'इण्नशजिसर्त्तिभ्यः क्वरप्' (३.२.१६३) इति ताच्छीलिके क्वरप्।

किमेतस्य भणने इदानीं लाभः। अस्ति प्रयोजनम्। इत्वरशब्दस्य इत्वरीशब्दस्य च व्याकरणप्रक्रियादर्शनमात्रमस्माकं लक्ष्यम्। तथापि मनाक्तस्यार्थं प्रति मनोऽन्वधावत्। अत एव मनः स्त्रीसमीपं न प्रेषणीयमिति प्रथितम्। नानेन स्त्रीनिन्दा गम्यते। स्तुतिरेव। यावदर्थमत्र प्रपञ्चे वस्तून्याश्रयणीयानि। अति सर्वत्र वर्जयेत्। साम्प्रतिके न खलु तथा कुलधर्माः परिपाल्यन्ते। सत्यम्। तदियं परिणतिः बहुधाकृतस्याकृतस्य। सर्वमेतदास्ताम्। व्याकरणमधीयानश्छात्रा वयम्। इत्वरशब्दस्य व्युत्पत्तिं जिज्ञासवः प्रसङ्गात्तदर्थविषयेऽपि किञ्चिदन्वैषामहि। प्रकृतसूत्रेण 'इण् गतौ' (अदा.१०४५), 'णश अदर्शने' (दिवा.११९४), 'जि जये' (भ्वा.५६१), 'सृ गतौ' (भ्वा.९३२) इत्येतेभ्यो धातुभ्यस्तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु क्वरप्प्रत्ययो विहितः। तत्रायमित्वरशब्दो गतः। अन्येषां रूपाण्यग्रे वक्ष्यन्ते।

*